।। श्रीमते रामानुजाय नमः।।



# श्रीदेवनायकस्वामिदशकम्

(क) श्रीमत्सहस्रशुभचन्द्रसुदर्शनाख्ये
दिव्येऽतिभव्यसुमहोत्सवसत्प्रसङ्गे ।
श्रीदेवनायकगुरोः करपद्मयुग्मे
वाङ्मालिकेयमनघा सुसमर्प्यतेङ्गद्य ।।

(१) वानाद्रियोगिचरणाम्बुजचञ्चरीकः
श्रीसम्प्रदायपरिनिष्ठितभावपूर्णः ।
सौशील्यशेवधिरनन्तगुणैकतानः
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(२) विद्याविहाररसिको विनयैकराशिः
स्वाचार्यवर्यपरिपूर्णकृपात्तबोधः ।
कैङ्कर्यनित्यनिरतो मितवाङ्मनीषी
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(३) साकेतपट्टणमठाधिपतिर्महीयान्
श्रीमद्यतीन्द्रमतवर्द्धनबद्धदीक्षः ।
कारुण्यपूर्णहृदयः कमनीयगात्रः
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(४) कौण्डिन्यवंशतिलकः कमनीयकीर्तिः
श्रीमुक्तिनाथतनयो बहुशिष्यवन्द्यः ।
आसेतुशैलविहिताखिलतीर्थयात्रः
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(५) श्रीगोमतीतटसमीपगनैमिषाख्ये
तीर्थे विनिर्मितसुसुन्दरदिव्यदेशः ।
श्रीवेङ्कटेशभगवन्महिमैकदर्शी
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(६) नारायणीतटसुसंस्थितदिव्यभव्य-
नारायणाख्यनगरेङ्गर्पितभूरिभावः ।
तत्रत्यवेङ्कटपतेर्जनको महिष्ठः
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(७) रामानुजार्यचरणाम्बुजभृङ्गराजः
राम्दीपुरीस्थितसुनिर्मलसत्प्रवाह-
श्रीगण्डकीतटविनिर्मितदिव्यवासः
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(८) देवाटदिव्यनगरस्थितदिव्यनद्यो-
र्मध्ये स्थितस्य बदरीशविभोः प्रभाव-
सम्वर्द्धनैकनिरतो नयनाभिरामः
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(९) श्रीबर्दियाजनपदस्थितदिव्यभूमौ
गोपाकृतेर्भगवतो नवनीतभोक्तुः ।
संस्थाप्य दिव्यभवनं परितोङ्गभिरक्षन्
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

(१०) आर्यादनन्तचरणात्समवाप्तदीक्षः
श्रीपुण्डरीकगुरुवर्द्धितभक्तिभूमा ।
गोपालसूरिचरणात्परिलब्धबोधः
श्रीदेवनायकगुरुर्जयताज्जगत्याम् ।।

श्रीकृष्णमार्यरचिता दशकात्मिकेयं
वाङ्मालिका सुललिता भगवत्प्रियस्य।
श्रीदेवनायकगुरोर्मुखपद्मतुष्ट्यै
भूयात्सहस्रशुभचन्द्रमहोत्सवेङ्गस्मिन् ।।

(श्रीकृष्णमाचार्यनिवेदितम्)

स्वस्ति श्रीर्दिशतात्
दिनाङ्कः- २०६९-११-३

।।श्रीमते रामानुजाय नमः।।



# 卐 नवरत्नमालिका 卐

कर्मठः कमलनेत्रशिक्षितो
ज्ञान-भक्तिपरिपक्वजीवनः ।
सम्प्रदायरसभावपूरितो
देवनायकगुरुः प्रवर्द्धताम् ।।१।।

शास्त्रसारगहनैकपारग-
स्तत्त्वबोधनचणो गुणार्णवः ।
अर्थपञ्चकपरायणो मुनि-
र्देवनायकगुरुर्विवर्द्धताम् ।।२।।

अजातशत्रुर्विमलान्तरङ्गो
वानाद्रिरामानुजभक्तिभूमा ।
अनन्तपादाम्बुजचञ्चरीकः
प्रवर्द्धतामत्र हि देवनाथः ।।३।।

जीयादनन्तगुरुवर्यपदाब्जभृङ्गः
श्रीपुण्डरीकनयनार्जितधीर्वदान्यः ।
गोपालसूरिचरणात्परिलब्धबोधः
श्रीदेवनायकगुरुर्जयतान्महिष्ठः ।।४।।

अनन्तपादाम्बुजभक्तिभावितः
प्रख्यातकीर्तिर्बहुशिष्यसेवितः ।
मठाधिपो मान्यतमो महीयसां
विभातु भूमौ स तु देवनायकः ।।५।।

भगवति वेङ्कटेशचरणेऽर्पितसर्वभरः
यतिपतिसम्प्रदायशरणो भुवि भाग्यनिधिः ।
सुविमलमानसश्शठरिपोर्निगमैकरतः
जयतु स देवनायकगुरुर्बहुशिष्ययुतः ।६।

गगनगिरीन्द्रपादकमलाम्बुजसद्भ्रमरः
अवधसुदिव्यदेशमठगो बहुशिष्यनुतः ।
विमलवचोनिधिर्विनयशेवधिराप्ततमः
जयतु स देवनायकगुरुर्भगवत्प्रवणः ।।७।।

अनन्तदेशिकेन्द्रपाद-पद्मयुग्मदीक्षितो
द्व्यशीतिवर्षपारगो गुणार्णवोऽतिसात्त्विकः ।
यतीन्द्रसम्प्रदायनिष्ठमानितोऽयमन्वहं
सहस्रचन्द्रदर्शकोऽस्तु देवनायकस्सदा ।।८।।

सौम्यश्श्रीमदनन्तदेशिकपदाम्भोजैकनिष्ठान्वितः
श्रीरामानुजसम्प्रदायसरणौ प्रख्यातकीर्तिस्सदा ।
गोपालार्यपदाब्जलब्ध-भगवद्विद्याविभूतिमर्हान्
जीयान्नित्यमतन्द्रितो गुणनिधिश्श्रीदेवनाथो गुरुः ।९।

वाचिकी वरिवस्येयं कृष्णमाचार्यगुम्फिता ।
देवनायकवर्याणां कराब्जयुगलेऽर्पिता ।।

卐 स्वस्ति 卐

**श्रीकृष्णमाचार्य**
गैंडाकोट-नवलपरासी

।।श्रीः।।

**।।श्रीमते रामानुजाय नमः।।**

**।।श्रीमते वानाद्रियोगिने नमः।।**



# अभिनन्दनपत्रम्

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्याणामुभयवेदान्त-प्रवर्तकाचार्याणां श्रीमद्रामानुजसम्प्रदायसंरक्षण-संवर्धनपरायणानां मठमन्दिरादिनिर्माणपूर्वकभगवद्विग्रह प्रतिष्ठापनादिकार्ये निरतानां धर्मप्रचारकालक्षेपाद्यर्थ विविधक्षेत्रयात्रारतानामयोध्यावासरसिकानां साकेतस्थितस्वर्गद्वारसप्तसागरस्थित वेङ्कटेशमन्दिराद्यनेकस्थानानां मठाधीशाना**मनन्तश्रीविभूषितानां श्रीदेवनायकाचार्यस्वामिवर्याणां** त्र्यशीतितमे जन्मोत्सवे तेषां करकमलायोः समर्पितम्

# अभिनन्दनपत्रम्

वेदमार्गप्रतिष्ठाता वेदान्तद्वयपारगः ।
श्रीदेवनायकाचार्यः सदा विजयतेतराम् ।।१।।
देवमन्दिरनिर्माणे कृतभूरिपरिश्रमः ।
शतं वर्षाणि सानन्दो जीवतु देवनायकः ।।२।।
अनन्तार्य कृपालब्धमन्त्रार्थो देशिकेश्वरः ।
पङ्कजाक्षाप्तसद्भारो वर्धतामाभिवर्धताम् ।।३।।
श्रीमद्देवसुनायकं मुनिवरं नित्यं प्रपद्यामहे
श्रीवानाद्रियतीन्द्रपादकमलद्वन्द्वाश्रितं सादरम् ।।
श्रीमत् श्रीमदनन्तसूरिवचने संलग्नचित्तं मुदा
वन्दे सद्गुणसागरं गुरुवरं वेदान्तविद्यायुतम् ।।४।।
शिष्योद्बोधनतत्परं हि कतिचित् स्थानादि संस्थापकं
सद्ग्रन्थस्य प्रकाशकं बुधवरं सत्साधुवृत्त्यायुतम् ।।
श्रीमद्देवसुनायकार्यममलं स्वाचार्यनिष्ठं गुरुं
सश्रद्धं त्वभिनन्दयाम इह वै भक्ताः समे सादरम् ।।५।।

**डा. श्रीकेशवप्रपन्नाचार्यः**
**(साहित्याचार्यः)**

।।श्रीमते रामानुजाय नमः।।



## समभिन्दनपत्रशतपत्रपत्रम्

श्रीमद्वेदमार्ग-प्रतिष्ठापनाचार्योभयवेदान्तप्रवर्तकाचार्याणां श्रीमदनन्त श्रीविभूषितवानमहाद्रिदेशिककृपाकूपारापारपरीवाहाप्लवेपरिपूतचेतस्कानन्त श्रीकानन्तगुणागारानन्ताचार्यस्वामिवर्यद्योदधि-परिपूतधीमतां सतां शमदमदयादाक्षिण्याद्यशेषसदाचार्योचित-गुणविभूषितानां परिनिष्ठितानुरूप परस्परानुरागिबहुविद्वत्सुशिष्य-प्रगृहीत-बहुमठ-मन्दिरसञ्चालनादिभारतया नितान्त-शान्तस्वान्तानां सर्वलोकसुहृदां भारतनेपालदेशद्वयानन्तजन-परिचरित-चरणद्वयानामद्वयानां सदामोददामोदरदयोदन्वत्तरङ्ग भङ्गसङ्ग सदामोदानां प्रत्नाचार्यरत्नानां प्रविष्टचतुरशीतिहायनकायानां चतुरशीतिलक्ष जनन-मरण-पदवीदवीयसीं यतीं सतिं मतिमद्भ्यः संप्रयच्छतां श्रीदेवनायकाचार्याणाममलयोः करकमलयोः श्रद्धाशतवता सतहृदा सतां महतां सप्तपर्वदासेन सत्सुहृदा जगन्नाथाचार्येणाविहिताकार्येण समर्पितम् ।

## संस्कृतसमभिन्दनपत्रशतपत्रपत्रम्

महात्मानो महान्तस्ते महत्सेवामहाव्रताः ।
जयन्तु जगतामिष्टा मिष्टा श्रीदेवनायकाः ।।१।।
नैमिषारण्यविषया नेपालविषया अपि ।
अयोध्याध्यासरसिकाः स्वार्याः सन्तु निरामयाः ।२।

क: समः खलु यच्छिष्यो बालकृष्णः समः सुधीः ।
गुरुदेवेन तेन स्यान्नतेन वपुषा ब्रुवे ।।३।।
यच्छुभाशंसनात् शुभ्रात् श्रीकृष्णार्यो विदुत्तमः ।
देशद्वयस्य विद्वत्सु प्रथमांपङ्क्तिमश्नुते ।।४।।
पद्मनाभः पद्मनाभप्रियो लोकप्रियश्च यः ।
अनुशिष्टो येन विदा स केन मीयतामिह ।।५।।
यतीन्द्रतामेति शीलैर्यत् समाश्रयणात् सुधीः ।
बदरीस्थो दरीस्थश्च यतीन्द्रो यतिना समः ।।६।।
वाचि सत्यं हृदि दया करे दानं परे नतिः ।
द्वितीयजन्मदे प्रीतिर्यस्य तस्मै सती नतिः ।।७।।
अयोध्यानागरः स्थानं त्वदीयः सप्तसागर :।
सप्तपर्वात्मकं दास्यं प्रपन्नानां प्रबोधयेत् ।।८।।
समेधन्ते यतो लब्धोदयाः स्मार्ताश्च वैष्णवाः ।
तमप्रमेयमहात्म्यं शरण्यं को न संश्रयेत् ।।९।।

**स्वामी श्री जगन्नाथाचार्यः**
मठाधीशः श्रीवैकुण्ठनाथमन्दिरस्य
नेपाली विभागाध्यक्षः सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य

## 卐 श्रीदेवनायकस्वामिनामाचार्यादिस्तवः 卐

भक्तिज्ञानप्रपत्तीनामालयं करुणालयम् ।
पराङ्कुशाभिधं धर्म्यमस्माकीनं धनं स्तुमः ।।१।।
आस्याद्रामानुजः कूरसखोऽस्य जगतस्तमः ।
सर्वदेहिषु यो नित्यमसमः परमः समः ।।२।।
सदा दामोदरामोदां गोदामामोददायिकाम् ।
नुमः कल्पलतान्तान्तु मातरं रङ्गनायिकाम् ।।३।।
यदाहुः पुनरुद्भूतं रामानुजमहामुनिम् ।
वन्दामहे महीयस्तत् तेजो वरवराभिधम् ।।४।।
यत्र संयमिनः शान्ताः समा नरवरोमाः ।
परस्परसमा भान्ति परत्र त्वतिदुर्लभः ।।५।।
आद्यां वारवरीं धारां यतिराजपदाश्रयाम् ।
श्रीतोतागिरिसम्भूतांमद्भुतां तां विभावये ।।६।।
नेपाले वैष्णवत्वस्याङ्कुरणे सफलश्रमम् ।
अयोध्यास्वर्गद्वारस्थमनन्ताचार्यं न वेत्ति कः ?।।७।।
तदुत्तरं स्वपूर्वार्यपदपङ्क्तिजुषं च तम् ।
जानाति वैष्णवो लोकः कमलं नयनान्वितम् ।।८।।
अनन्तोत्थसत्कमलद्रुमपोतोत्थितो द्रुमः ।
श्रीदेवनायकाचार्ये स्वार्योभातु जगद्गुरु :।।९।।
नवलाख्यपुरस्यास्य यमाहुः प्रथमं शिरः ।
महाभारतरत्नं तं प्रत्नं गिरिमुपास्महे ।।१०।।
यत्रावतीर्णं कौन्डिन्यान्वयेऽनेन महात्मना ।।
एतदुत्भूतिहेतुं तं रुचाङाभिधमुत्तमम् ।
पवित्रनद्योरुभयोर्मध्यस्थं गिरिमाश्रये ।।११।।

**स्वामी श्रीजगन्नाथाचार्यः**
मठाधीशः श्रीवैकुण्ठनाथ मन्दिरस्य
नेपाली विभागाध्यक्षः सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य

।।ॐ श्रियै नमः।।

।।ॐ अस्मद्गुरुभ्यो नमः।।

।।श्रीमते रामानुजाय नमः।।



श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ।।
रम्यजामातृयोगीन्द्र-पादारेखामयं सदा ।
तदायत्तात्मसत्तादिं रामानुजमुनिं भजे ।।

## रामानुजाचार्यदिव्याज्ञा वर्धतामभिवर्धताम्

जीव कल्याणको यस दिव्य उद्घोषलाई पूज्य श्री स्वामी देवनायकाचार्यज्यू महाराजका जीवनले सार्थकता तुल्याएको छ । सुयोग्य उत्तराधिकारीहरूको सहज प्राप्ति र श्री भगवन्मुखोल्लासको निरन्तर अभिवृद्धि गर्नाले यो स्पष्ट हुन्छ । आजीवन मधुर र कर्मठ स्वभाव भएको यस्तो लोकोपकारी सन्तको प्रेरक जीवनचर्या प्रकाशित गरेर सुदीर्घ जीवनको मङ्गलाशासन गर्दै सम्मान समारोहहरू गर्नु समाजको लागि वाञ्छनीय कुरा हो ।

कृपाभिलाषी
डा. स्वामी श्रीमहीधराचार्यः
श्रीवेदान्तकुटीरम्, देवघाटधाम

।।श्रीमते रामानुजाय नमः।।
।।श्रीमते वानाद्रियोगिने नमः।।

# सम्पादकीय...

**साक्षान्नारायणो देवः कृत्वा मर्त्यमयीं तनुम् ।**
**मग्नानुद्धरते लोकान् कारुण्यात् शास्त्रपाणिना ।।**

करुणाद्वारा साक्षात् भगवान् नारायणले नै मनुष्यमय शरीरधारण गरी संसार सागरमा डुबेका जीवात्माहरूलाई शास्त्ररूप करकमलद्वारा उद्धार गर्नुहुन्छ । यसप्रकार शास्त्र वचन अनुसार 'गुरु' शब्दको अर्थ अज्ञानरूपी अन्धकारलाई विनाश गरी ज्ञानरूप उज्यालो प्रदान गर्ने भन्ने हुन्छ । **"आचार्यं मां विजानीयात्"** भनेर भगवान्ले 'आचार्यलाई मेरै स्वरूप जान्नु', **'आचार्य देवो भव'** (तैत्तिरियोपनिषद्) 'आचार्यलाई देवता मान' र भगवद्गीतामा पनि **"ज्ञानी त्वात्मैव मे मतम्"** ज्ञानी मेरा आत्मा हुन् भनेर भगवान्ले आफूलाई शरीरस्थानीय बताउनु एवम् स्वयं पनि आचार्य बन्न लालायित हुनु आदिले आचार्यको महत्व सर्वोपरि सिद्ध हुन्छ ।

सार्वभौम विशिष्टाद्वैत-सिद्धान्तावलम्बी श्रीसम्प्रदायका विशिष्ट प्रचारक हाम्रा पूर्वाचार्यहरूका विशाल सुन्दरमार्गमा अक्षुण्ण विचरण गर्ने सदाचार्यहरूको पङ्क्तिमा श्रीमद्वेदमार्ग प्रतिष्ठापनाचार्य अनन्तश्री विभूषित श्री देवनायकाचार्य स्वामीजी महाराज विराजमान हुनुहुन्छ । श्रुतिप्रमाण अनुसार पनि **"आचार्य वंशेज्ञेयः असावसावित्या भगवत्तः"** भगवान् पर्यन्त आचार्य परम्परा (वंश) को ज्ञान परमश्रेयस्कर भएको हुँदा श्री स्वामीज्यूको प्रादुर्भावदेखि लिएर प्रेरणादायी विभिन्न व्यक्तित्व प्रकाशमा ल्याउन अत्यावश्यक समसामयिक ठहर गरी **"गुरुं प्रकाशयेद्धीमान्, मन्त्रं यत्नेन गोपयेत् ।"**

उक्तिलाई सार्थक गर्दै उपकार एवं कृतज्ञता स्मरण स्वरूप श्री स्वामीजीको वैभव प्रकाशमा आउँदा अनुकरणीय अलौकिक, अद्वितीय जीवनपद्धतिमा चल्ने प्रेरणा जागृत भई जनमानसमा भगवान्प्रति भक्तिभाव, वैदिक सनातन धर्मप्रति आस्था एवं सद्भाव, मठ मन्दिरको संरक्षण एवं सम्वर्धन र आध्यात्मिक चिन्तनको विकासमा सहयोग हुनेछ भन्ने विश्वासका साथ अनेकौं मठका मठाधीश आचार्य लक्षण सम्पन्न, देशकै गौरव स्वरूप राष्ट्रिय सम्मानयोग्य महापुरुष आबालब्रह्मचारी श्रद्धेय श्री १००८ देवनायकाचार्यजी महाराजको यही २०६९ साल फाल्गुन २, ३ र ४ गतेका दिन सम्पन्न हुन गइरहेको ८४ औं जन्मोत्सव (सहस्रपूर्णचन्द्रदर्शन) एवं अभिनन्दन कार्यक्रमको अवसरमा "आचार्य अभिनन्दन २०६९" नामक श्रीस्वामीज्यूको सच्चरित्रात्मक वैभवादि प्रकाशित गरिएको छ ।

८४औं जन्मोत्सव एवं आचार्य अभिनन्दन कार्यक्रम सम्पन्न गर्न गठित मूल आयोजक समिति एवं श्री शेषलक्ष्मीनारायण मन्दिर क्षेत्रपुर सञ्चालक समितिबाट प्रकाशित उक्त "आचार्य अभिनन्दन २०६९" को लागि विभिन्न विद्वान्हरूबाट प्राप्त लेख तथा रचनाहरूबाट पुस्तिकाको स्वरूप पाउन समर्थ भएको छ । आफ्ना अमूल्य लेख-रचना, भावोद्गारहरू यथासमयमै प्रदान गर्नुहुने श्रीवैष्णव परिषद्का केन्द्रीय अध्यक्ष **श्री देवराज आचार्य स्वामीज्यू,** आचार्य परिषद्का अध्यक्ष **त्रिवेणी श्रीमाधवाचार्यस्वामीज्यू** श्री रङ्गलक्ष्मी आ.स. महविद्यालयका वेदान्त विभागाध्यक्ष **श्रीमधुसूदनाचार्य स्वामीज्यू** सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसीका नेपाली विभागाध्यक्ष **श्रीजगन्नाथाचार्य स्वामीज्यू,** उत्तराधिकारी अयोध्या श्रीबालकृष्णाचार्य स्वामीज्यू, उभयवेदान्ताचार्य **श्रीकृष्णमाचार्य स्वामीज्यू,** जनक हजारी संस्कृत महाविद्यालयका **प्रा.डा. श्रीकेशवप्रपन्नाचार्यज्यू,** भाषाविद् **प्रा.डा. श्री चूडामणि बन्धुज्यू,** साहित्यकार **कपिल अज्ञातज्यू,** प्रकाशन कार्यमा सहयोग गर्नुहुने लालमणि पौड्याल एवं स्वामीजीप्रति अत्यन्त आदर र सद्भाव राखी यस आचार्य अभिनन्दन-२०६९ प्रकाशन गर्ने निर्णय गर्ने मन्दिर सञ्चालक समिति लगायत प्रत्यक्ष-अप्रत्यक्ष सहयोग गर्नुहुने, सल्लाह, सुझाव प्रदान गर्नुहुने सम्पूर्ण विद्वद्वर्गप्रति हार्दिक कृतज्ञता प्रकट गर्दछु । अन्तमा विज्ञ पाठकहरूबाट रचनात्मक सुझावको अपेक्षा सहित विश्राम लिन्छु ।

जय श्रीमन्नारायण ।

सम्पादक

**श्री स्वामी पद्मनाभाचार्य**

# विषयसूची


| विषय | | पेज नं. |
|---|---|---|
| श्री अभिनन्दनीय महापुरुष, | स्वामी श्री देवराज आचार्य, केन्द्रीय अध्यक्ष- श्रीवैष्णव परिषद् नेपाल | १ |
| महनीय महापुरुष | उभयवेदान्ताचार्य-श्रीकृष्णमाचार्य, गैंडाकोट | ५ |
| सर्वगुणसम्पन्न महान् आचार्यलाई अभिनन्दन | स्वामी श्रीमधुसूदनाचार्य वेदान्ती मठाधीश- श्री लक्ष्मीनारायण मन्दिर, रजौरा | ८ |
| श्रीदेवनायकाचार्य स्वामीज्यूका सम्मानमा | स्वामी श्रीमाधवाचार्य मठाधीश- श्रीलक्ष्मीवेङ्कटेश मन्दिर, त्रिवेणी | ९ |
| उदाहरणीय प्रेरक व्यक्तित्व श्रीस्वामीज्यू | सुशीला सिटौला संस्थापिका-श्रीबदरीनारायण मन्दिर | ११ |
| श्री १००८ देवनायकाचार्य स्वामी | प्रा.डा. श्री चूडामणि बन्धु | १२ |
| वयोविद्यावृद्ध शुद्धात्मा महात्माको काव्यात्मक अभिनन्दन | स्वामी श्रीजगन्नाथाचार्य मठाधीश- श्रीवैकुण्ठनाथ मन्दिर, लंक | १४ |
| वक्तव्यमाचार्यवैभवः (वर्णन गर्नु आचार्य वैभव) | स्वामी श्रीबालकृष्णाचार्य उत्तराधिकारी-श्रीशेषलक्ष्मीनारायण मन्दिर, स्वर्गद्वार | १५ |
| श्रीशेषलक्ष्मीनारायण मन्दिर क्षेत्रपुरः अतीत र वर्तमान | स्वामी श्रीपद्मनाभाचार्य उत्तराधिकारी श्रीशेषलक्ष्मीनारायण मन्दिर | १९ |
| स्वामी हे ! देवनायक | श्रीवरदराज रा. दास (भारद्वाज) | २५ |
| अनन्ताश्रम नेपाली मन्दिर नैमिषारण्यः एक परिचय | स्वामी श्रीविष्णुप्रपन्नाचार्य उत्तराधिकारी- अनन्ताश्रम तोताद्रिमठ नैमिषारण्य, | २६ |
| श्रीबदरीनारायण मन्दिरःएक परिचय | स्वामी श्रीयतीन्द्राचार्य उत्तराधिकारी- श्रीवदरीनारायणमन्दिर, देवघाट | २९ |
| स्वामी श्री देवनायकाचार्य र रामानुज आश्रम राम्दीधाम, पाल्पा | श्रीकेशवरमण रेग्मी सदस्यसचिव- श्रीरामानुजाश्रम, राम्दी, पाल्पा | ३२ |
| श्रीसम्प्रदाय-प्रवर्धनमा श्रीदेवनायकाचार्य स्वामीको योगदान | प्रा.डा. श्रीकेशवप्रपन्नाचार्य | ३८ |

| | | |
|---|---|---|
| **श्री देवनायकाचार्य स्वामीज्यूको वैभव** | डा. श्रीकेशवप्रपन्नाचार्य | ४० |
| **ज्योतिषमा सन्न्यासयोग** | कपिल अज्ञात | ४२ |
| **सिद्धहस्त महापुरुष** | स्वामी श्रीभागवताचार्य<br>मठाधीश- श्री वैकुण्ठनाथ दिव्यधाम | ४८ |
| **श्रीशेषलक्ष्मीनारायण मन्दिर क्षेत्रपुर २०६० साल यता भएका निर्माण.......** | लालमणि पौडेल<br>महासचिव- मन्दिर सञ्चालक समिति, क्षेत्रपुर | ४९ |
| **पश्येम शरदः शतम्** | श्री चतुर्भुजाचार्य (अधिकारी)<br>श्रीकूर्मनारायण मन्दिर, विभीषणकुण्ड, अयोध्या | ५३ |
| **देवकल्प महात्यागी सन्त देवनायकाचार्य स्वामीजी** | हरिलाल पौडेल<br>उपप्राध्यापक, भानु संस्कृत विद्यापीठ तनहुँ | ५५ |
| **महाजनो येन गतः स पन्थाः** | आचार्य नारायणप्रसाद शर्मा 'देवबाबा' | ५९ |
| **ऋषिकल्प गुरुदेव श्री देवनायकाचार्य** | शान्तप्रसाद पोखरेल<br>उपाध्यक्ष- मन्दिर सञ्चालक समिति, क्षेत्रपुर | ६२ |
| **भगवत्शक्तियुक्त आचार्यवरस्वामीज्यू** | दयामूर्ति पोखरेल<br>सदस्य - मन्दिर सञ्चालक समिति, क्षेत्रपुर | ६३ |
| **हरेर्नामैव केवलम्** | प्रकाशबाबु ढकाल<br>सदस्य- सत्सङ्ग समिति<br>श्रीशेषलक्ष्मीनारायण मन्दिर, क्षेत्रपुर | ६४ |
| **श्रीशेषलक्ष्मीनारायणमन्दिर, क्षेत्रपुर, नारायणगढका आजीवन सदस्यहरूको नामावली** | | ६६ |

>[j]6]zu{ydfnfsf] t[lokik

**ग्रन्थ नाम** : आचार्य अभिनन्दन २०६९
**प्रकाशक** : श्रीशेषलक्ष्मीनारायण मन्दिर, क्षेत्रपुर-२, नारायणगढ, चितवन
**प्रकाशन वर्ष** : २०६९ फाल्गुण श्रीपञ्चमी
**संस्करण** : प्रथम
**प्रति** : ७०१ प्रति
**सम्पादक** : श्रीपद्मनाभाचार्य
**मूल्य** : १५५/-(सहयोग स्वरुप)
**कम्प्युटर सेटिङ्ग**: कालिका कम्प्युटर सर्भिस, प्रेसमार्ग
सम्पर्कः ९८४५३२५८३३, ९८४५३६६६५३
**मुद्रक** : चित्रवन प्रिन्टर्स प्रा.लि., प्रेसमार्ग

अनन्तश्रीविभूषित देवनायकाचार्य स्वामीज्यूको ८४औं जन्मोत्सव एवम् आचार्य अभिनन्दन महोत्सवको अवसरमा प्रकाशित...